Roll No. ..........................

Total No. of Pages : 6

Total No. of Questions : 28

# उत्तरमध्यमा द्वितीयखण्ड (12वीं) वार्षिक परीक्षा 2025-26

**विषय कोड : 1218**

## वेदः (परम्परागतः)

समय : 3 घण्टे

पूर्णांक : 100

---

1. उचितविकल्पं चित्वा लिखत – 6×1=6

(क) शुक्लयजुर्वेदे सन्ति–

(1) श्लोकाः (2) मंत्राः

(3) आख्यायिकाः (4) यंत्राः

(ख) माध्यन्दिन् संहितायाम् अध्यायाः सन्ति

(1) त्रिंशत् (2) चत्वारिंशत्

(3) एकोनचत्वारिंशत् (4) एकचत्वारिंशत्

(ग) शुक्लयजुर्वेदस्य एकत्रिंशदध्याये कति मंत्राः सन्ति ?

(1) द्वाविंशतिः (2) एकविंशतिः

(3) त्रयोविंशतिः (4) नवदश

(घ) आदिवेदः कः ?

(1) सामवेदः (2) अथर्ववेदः

(3) यजुर्वेदः (4) ऋग्वेदः

(ङ) ॐ खम्ब्रह्म अयं मंत्रः चत्वारिंशदध्यायस्य अस्ति–

(1) आदिमंत्रः (2) अन्तिममंत्रः

(3) द्वितीयमंत्रः (4) पञ्चममन्त्रः

(च) माध्यन्दिन संहितायां कति विकृतयः सन्ति ?

(1) दश (2) सप्त

(3) अष्ट (4) पञ्च

2. रिक्तस्थानानि पूरयत – 6×1=6

(देवं, तन्मे मनः, शिवो वेदः, ॐकारस्य, कृष्णः भारद्वाजः)

(क) वेदानां स्वाध्याये ........................ उच्चारणम् अनिवार्यम् अस्ति।

(ख) वेदः शिवो .................... वेदाध्यायी सदाशिवः।

(ग) उदुत्यञ्जातवेदसन् .................... व्वहन्ति केतवः।

(घ) उदात्त स्वरस्य .................... गोत्रः।

(ङ) यष्मानऽऋतेकिञ्चन कर्म्मस्क्रियेत .................... शिवसङ्कल्पमस्तु।।

(च) स्वरित स्वरस्य ........................ वर्णः।

3. यथायोग्यं योजयत – 6×1=6

| | |
|---|---|
| (क) चन्द्रमा | (i) मुखम् |
| (ख) आपोहिष्ठा | (ii) चक्षसे |
| (ग) महेरणाय | (iii) मनसः |
| (घ) मुखात् | (iv) मयोभुवः |
| (ङ) पञ्चनद्यः | (v) अग्निरजायत |
| (च) ब्राह्मणोऽस्य | (vi) सरस्वती |

4. सत्यासत्यं लिखत — 7×1=7

(क) आभीष्टासने उपविश्य वेदपाठः भवति। (सत्यम्/असत्यम्)

(ख) "आकृष्णे नरजसा" सूर्यावाहन मंत्रः अस्ति। (सत्यम्/असत्यम्)

(ग) एकत्रिंशदध्याये पुरुषसूक्तं विद्यते। (सत्यम्/असत्यम्)

(घ) "चन्द्रमामनसः" अयं मन्त्रः दीपकस्य अस्ति। (सत्यम्/असत्यम्)

(ङ) परमपुरुषस्य वर्णनम् एकत्रिंशदध्याये अस्ति। (सत्यम्/असत्यम्)

(च) "ईशावास्यमिदं सर्वं" चत्वारिंशदध्याये नास्ति। (सत्यम्/असत्यम्)

(छ) वेदेषु अशीति सहस्रं संख्यकाः मन्त्राः कर्मकाण्डस्य सन्ति। (सत्यम्/असत्यम्)

5. एकपदेन उत्तरं लिखत — 7×1=7

(क) द्वात्रिंशदध्याये कति मन्त्राः सन्ति ?

(ख) वेदस्य मुखम् किम् ?

(ग) मूर्द्धानन्दिवोऽअरतिम् अयं मन्त्रः कस्मिन्नध्याये विहितः ?

(घ) विराट् पुरुषस्य वर्णनं कस्मिन्नध्याये विहितम् ?

(ङ) निगम शब्दस्य पर्यायः कः ?

(च) वाजसनेयी शाखा कस्य वेदस्य अस्ति ?

(छ) "योवः शिवतमोरसः" अयं मन्त्रः कस्मिन्नध्याये विद्यते ?

6. "एतावानस्य महिमातो" अयं मंत्रः कस्मिन् अध्याये विहितः ? अध्यायो लेख्यः मंत्रः प्रपूर्यताम्। 2

7. "यज्ञेन यज्ञमयजन्त" इति मंत्रः प्रपूर्यताम्। 2

8. "दैव्यावद्ध्वर्ब्यूऽआगत६" इति मंत्रः प्रपूर्यताम्। 2

9. "आनऽइडाभिर्व्विदक्षेसुशस्ति" इति मंत्रः प्रपूर्यताम्। 2

10. येनेदम्भूतम्भुवनम्भविष्यत्परि ग्रहीतममृतेनसर्व्वम्॥ प्रश्ने लिखितस्य पदस्य स्वरलेखं कुरुत। 2

11. यस्मिन्नृचः सामयज् ()षिर्यस्मिन् प्रतिष्ठुतरथना भाविवाराः॥ 2

प्रश्ने लिखितस्य पदस्य स्वरलेखं कुरुत।

12. षट्त्रिंशदध्यायस्य आदिमन्त्रं लिखन्तु। 2

13. ''कयात्वनऽऊत्याभिप्रमन्दसोवृषन्'' इति मंत्रः प्रपूर्यताम्। 2

14. ॐ स्वाहाप्राणेभ्यः साधिपतिकेभ्यः। 2

अयं मन्त्रः कस्मिन्नध्याये विहितः ?

प्रश्ने लिखितस्य पदस्य स्वरलेखं कुरुत।

15. ''उग्रश्श्चभीमश्श्च'' मंत्रं सम्पूर्य स्वरलेखं कुरुत। 2

16. ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात्। अस्य मन्त्रस्य हिंदी भाषायाम् अनुवादं कुरुत। 3

**अथवा**

द्वात्रिंशदध्यायस्य आदि मन्त्रं लिखत।

17. एकत्रिंशदध्यायस्य अन्तिमं मंत्रं लिखन्तु। 3

**अथवा**

मेघाम्मे वरुणोददातु मेधामग्निः। अयं मन्त्रः कस्मिन्नध्याये विहितः ? प्रश्ने लिखितस्य पदस्य स्वरलेखं कुरुत।

18. आदद्यादेवाऽउदिता सूर्य्यस्य निरंहसः पिपृतानिरवद्यात। अयं मन्त्रः कस्मिन् अध्याये विद्यते ?

प्रश्ने लिखितस्य पदस्य स्वरलेखं कुर्वन्तु। 3

**अथवा**

''आकृष्णेनरजसाव्वर्तमानो'' इति मंत्रः विलिख्यताम्।

19. शुक्लयजुर्वेदस्योपवेदः कः ? उपवेद विषये **दश** शब्दान् लिखन्तु। 3

**अथवा**

''स्योनापृथिविनोभ्वा'' मन्त्रमिमं सम्पूर्य स्वरलेखं कुर्वन्तु।

20. ''द्यौ॑ऽ॒ शान्तिरन्तरिक्ष॑ शान्तिः'' अस्य मन्त्रस्य हिन्दीभाषायाम् अनुवादं कुर्वन्तु। 3

**अथवा**

सप्तत्रिंशदध्यायस्य आदिमं मन्त्रं लिखन्तु।

21. प्रश्नपत्रे समागतान् मन्त्रान् विहाय चत्वारिंशदध्यायस्य कमपि मंत्रं लिखन्तु। 3

**अथवा**

ॐ ३ खम्ब्रह्म'' अयं मन्त्रः कस्मिन् अध्याये: विहितः ? व्याख्यां च कुरुत।

**दीर्घोत्तरीय प्रश्नाः —**

22. बृहदारण्यकोपनिषदः रचनाकारः कः ? तस्य विषये वर्णनं कुरुत। 4

**अथवा**

अधोलिखितेषु मन्त्रेषु कौ अपि **द्वौ** मन्त्रौ स्वरसहितौ प्रपूर्यताम्–

(1) यत्पुरुषेण हविषा ........................... शरद्धविः॑।

(2) सप्तास्या सन्नपरि ........................... पुरुषम्पशुम्।

(3) वज्रेनवज्रमय ........................... सन्ति देवाः।

(4) अदभ्यः सम्भृतः .................. जानमग्ने।।

23. माध्यन्दिन संहिताया त्रयस्त्रिंशदध्यायस्य प्रश्नपत्रे समागतान् मन्त्रान् विहाय मन्त्रमेकं लिखन्तु। 4

**अथवा**

वेदानां नामानि उल्लिख्य कस्यापि **एकस्य** सविस्तरं वर्णनं कुरुत।

24. "ॐ यज्जाग्रतोदूरमुदैति" मन्त्रं सम्पूर्य ससंदर्भ व्याख्यां कुरुत। 4

**अथवा**

"उत्तिष्ठब्रह्मणस्पतेदेवयन्तस्त्वेमहे" मंत्रमिमं सम्पूर्य स्वरलेखं कुर्वन्तु।

25. षड्त्रिंशदध्यायस्य सस्वरं प्रथमं मंत्रं लिखत। 4

**अथवा**

"आयासायस्वाहा प्रायासायस्वाहा संय्यासाय स्वाहा" मन्त्रमिमं सम्पूर्य व्याख्यां कुरुत।

**अथवा**

गायत्री मंत्रस्य हिन्दयाम् अनुवादों विधेय।

26. दक्षिणभारते यजुर्वेदस्य का शाखा प्रचलिता ? तस्याः विषये दश शब्दान् लिखन्तु। 4

**अथवा**

"अग्नेनयसुपथारायेऽअस्मान्" मंत्रमिमं सम्पूर्य व्याख्यां कुरुत।

27. "वेदानां महत्त्वम्" शतशब्देषु निबन्धः विलिख्यताम्। 5

**अथवा**

वेदेषु पर्यावरणम् इति विषये निबन्धं लिखन्तु।

28. पाठ्यक्रमान्तर्गत प्रश्नपत्रे समागतान् मन्त्रान् विहाय किमपि मन्त्रद्वयं विलिख्यताम। 5

**अथवा**

पारस्करगृह्यसूत्रानुसारेण मानवजीवने षोडश संस्काराः भवन्ति। एकस्य सविस्तरं वर्णनं कुरुत।